International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 200-204
© 2026 IJMH
www.themultijournal.com

Received: 30-05-2026
Accepted: 24-06-2026
Publish : 26-06-2026

Manjunath Hegde
Research Scholar,
Department of Jyotisha,
Karnataka Samskrit University,
Chamarajpete, Bangalore

Correspondence:
Manjunath Hegde
Research Scholar,
Department of Jyotisha,
Karnataka Samskrit University,
Chamarajpete, Bangalore

जन्मकालिकदोषशान्तिविधीनां शास्त्रीयाधारः तथा अनुष्ठानपरम्परा

Manjunath Hegde

DOI: https://doi.org/10.5281/zenodo.23884029

सारसङ्क्षेपः

भारतीयज्ञानपरम्परायां वेदाङ्गज्योतिषं धर्मशास्त्रं च परस्परं सम्पूरकौ स्तम्भवितौ स्तः। मानवजीवनस्य प्रारम्भादेव कालस्य सूक्ष्मावयवाः ग्रहनक्षत्रतिथियोगकरणादयश्च व्यष्टिचैतन्यं समष्टिपरिवेशं च निरन्तरं प्रभावितं कुर्वन्ति। यदा कश्चन शिशुः विशिष्टेषु खगोलीयकालसन्धिषु उत असामान्येषु दैहिकपरिस्थितिषु जन्म गृह्णाति, तदा शास्त्रेषु तज्जनितस्य अरिष्टस्य वा प्रतिकूलप्रभावस्य संज्ञा जन्मकालिकदोषः इति निर्दिश्यते। अस्य शोधप्रबन्धस्य मुख्योद्देश्यं जन्मकालिकदोषशान्तिविधीनां मूलभूतस्य शास्त्रीयाधारस्य अन्वेषणं तथा च लोकव्यवहारप्रचलितस्य अनुष्ठानपरम्परायाः प्रामाणिकं समालोचनात्मकं च मीमांसनं वर्तते। शोधेऽस्मिन् वर्णनात्मक-विश्लेषणात्मक-तुलनात्मकशोध-पद्धतीनामाश्रयेण वैदिकसंहितातः आरभ्य महर्षिपराशरप्रणीतं बृहत्पाराशरहोराशास्त्रं, वराहमिहिरकृतं बृहज्जातकं बृहत्संहिता च, वैद्यनाथदैवज्ञकृतं जातकपारिजातं, रामदैवज्ञकृतं मुहूर्तचिन्तामणिं, कमलाकरभट्टकृतं निर्णयसिन्धुं, नीलकण्ठभट्टकृतं शान्तिमयूखं, काशीनाथोपाध्यायकृतं धर्मसिन्धुं च समालोच्य दोषशान्तेः सैद्धान्तिकं व्यावहारिकं च स्वरूपं स्पष्टीकृतम्। मुख्यविवेचने त्रिविधगण्डान्तस्य (तिथि-नक्षत्र-लग्नगण्डान्तानां), मूलनक्षत्रस्य अभुक्तमूलस्य च घटिकात्मकं मानं, कृष्णचतुर्दश्याः षडंशविभागानां शुभाशुभफलं, सिनीवाली-दर्श-कुहूभेदेन अमावास्याप्रसवस्य चन्द्रकलाक्षयजनितं कारणं, तथा च एकनक्षत्र-त्रिकप्रसव-सदन्त-नालवेष्टित-यमलजन्मनां शास्त्रीयमान्यताः सप्रमाणं प्रतिपादिताः सन्ति। अनुष्ठानपरम्परायाः विमर्शे शतच्छिद्रकरकस्नानं, सप्तधान्य-सप्तमृत्तिका-सप्तविंशतितीर्थजलप्रयोगः, चतुष्कलशस्थापनं, स्वर्णमयमूलपुरुषपूजनं, एकाशीतिदर्भपरिस्तरणपूर्वकं वैदिकमन्त्रैर्हवनं, षोडशपलकांस्यपात्रे घृतपूर्णछायादानं, वंशपात्रद्वयमाध्यमेन गोमुखप्रसवविधिश्चेति पञ्चाङ्गिकप्रक्रियायाः दार्शनिकं मनोवैज्ञानिकं च रहस्यं सम्यक् उद्घाटितम्। निष्कर्षरूपेण प्रबन्धेऽस्मिन् स्थापितं यत् जन्मकालिकदोषशान्तिविधयः न केवलं भीतिनिवारकाः अपि तु अदृढप्रारब्धकर्मणां रूपान्तरणाय, पारिवारिकमनोबलवर्धनाय, मातृशिश्वोः आरोग्याय च महर्षिभिः प्रवर्तिताः सूक्ष्माः आध्यात्मिकचिकित्साप्रणाल्यः सन्ति।

मुख्यशब्दाः

जन्मकालिकदोषः, त्रिविधगण्डान्तम्, अभुक्तमूलम्, कृष्णचतुर्दशीषडंशः, सिनीवाली-कुहू-अमावास्या, गोमुखप्रसवः, छायादानम्, शतच्छिद्रकरकस्नानम्, बृहत्पाराशरहोराशास्त्रम्, धर्मसिन्धुः।

प्रस्तावना

ज्योतिषशास्त्रस्य मुख्यं प्रयोजनं मानवानाम् अदृष्टकर्मफलस्य प्रकाशनं तज्जनितसङ्कटानां निवारणं च विद्यते। पूर्वसूरिभिः स्पष्टमेवोक्तम्—

"शुभाशुभफलादेशो ज्योतिःशास्त्रप्रयोजनम्।
स च लग्नबलाधीनः कथितः पूर्वसूरिभिः॥
भचक्रस्य समा भागा उक्ता द्वादश राशयः।
राशीनामुदयो लग्नं ते तु मेषवृषादयः॥" (जन्मकुण्डलीरचना १.२२) इति।

अन्येषु शास्त्रेषु अप्रत्यक्षत्वाद् परस्परं विवादो भवितुमर्हति, परं तु ज्योतिषशास्त्रं प्रत्यक्षं शास्त्रमस्ति यत्र सूर्यचन्द्रौ साक्षिणौ स्तः—

"अप्रत्यक्षाणि शास्त्राणि विवादस्तत्र केवलः।
प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ॥"

(जन्मकुण्डलीरचना १.२३) इति।

महर्षिणा पराशरेण मैत्रेयमुनेः जिज्ञासां शमयितुं होरा-गणित-संहितात्मकं त्रिस्कन्धं ज्योतिषं वेदानामुत्तममङ्गं परं गुह्यं च प्रतिपादितम्—

"भगवन् परमं पुण्यं गुह्यं वेदाङ्गमुत्तमम्।
त्रिस्कन्धं ज्यौतिषं होरा गणितं संहितेति च॥"

(बृहत्पाराशरहोराशास्त्रम् १.१३) तथा च

"सूर्यं नत्वा ग्रहपतिं जगदुत्पत्तिकारणम्।
वक्ष्यामि वेदनयनं यथा ब्रह्ममुखाच्छ्रुतम्॥"

(बृहत्पाराशरहोराशास्त्रम् १.१६) इति।

वैदिकदर्शनदृष्ट्या जीवस्य जन्मान्तरार्जितं कर्म त्रिविधं भवति— सञ्चितं, प्रारब्धं, क्रियमाणं चेति। प्रारब्धकर्मणः अपि द्वौ भेदौ शास्त्रेषु स्वीकृतौ— दृढं कर्म अदृढं कर्म चेति। आचार्यवराहमिहिरेण बृहज्जातके प्रतिपादितं यत् अहोरात्रशब्दस्य पूर्वापरवर्णलोपात् निष्पन्नं होराशास्त्रं पूर्वजन्मार्जितस्य सदसत्कर्मणः पङ्क्तिं समभिव्यनक्ति— "होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्ण-लोपात्। कर्मार्जितं पूर्वभवे सदादि यत्तस्य पङ्क्तिं समभिव्यनक्ति॥" (बृहज्जातकम् १.३) इति। कल्याणवर्मणा अपि सारावल्यां जातकशास्त्रं विपत्समुद्रे नौकास्वरूपमुपवर्णितम्— "अर्थार्जने सहायः पुरुषाणामापदर्णवे पोतः। यात्रासमये मन्त्री जातकमपहाय नास्त्यपरः॥" (सारावली १.४) इति। श्रीनिवासपाठकेन दशाफल-दर्पणे सर्वार्थचिन्तामणिमुद्धृत्य प्रोक्तं यत् सर्वे योगाः राजयोगाः अरिष्टयोगाश्च ग्रहबलवशात् दशाक्रमेणैव फलं ददति—
"दशानुरोधेन फलं वदन्ति मुनीश्वरा जातशुभाशुभं तत्" (दशाफलदर्पणम् १.६) इति।

अत्रायं दार्शनिकः प्रश्नः समुत्तिष्ठति यत् यदि जन्मकालिक-ग्रहनक्षत्रस्थितिः पूर्वजन्मकर्मणां सूचिका अस्ति, तर्हि शान्तिविधिना तस्याः परिवर्तनं कथं सम्भवति इति। अस्य समाधाने शास्त्रकाराणां मतमस्ति यत् दृढं प्रारब्धं तु भोगेनैव क्षीयते, परं तु अदृढं मिश्रं वा प्रारब्धं मन्त्र-औषध-रत्न-दान-जप-होम-शान्तिकर्मभिः प्रशमयितुं शक्यते। कलियुगे धर्मव्यवस्थायाः आधाररूपेण पाराशरमतस्य वैशिष्ट्यं स्मृतिषु उद्घोषितम्— "कृते तु मानवो धर्मस्त्रेतायां गौतमः स्मृतः। द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृतः॥" (पराशरस्मृतिः १.२४) इति। स एव महर्षिः पराशरः होराशास्त्रे निर्देशं ददाति यत् अशुभदशायां दोषयोगे वा विचक्षणः पुरुषः शान्तिं समाचरेत्— "दशा-अंशक्रमेणैव ज्ञात्वा सर्वं फलं वदेत्। क्रूरग्रहदशाकाले शान्तिं कुर्याद्विचक्षणः॥" (बृहत्पाराशरहोराशास्त्रम् ५१.३५) इति। अतः जन्मकालिकदोषशान्तिविधयः कर्मसिद्धान्तस्य बाधकाः न भूत्वा क्रियमाणपुण्यकर्मणा प्रारब्धस्य तीव्रतायाः उपशमकाः सन्ति।

मुख्यविवेचनम्

१. कालविधानशास्त्रे जन्मकालिकदोषस्वरूपं मुहूर्तगणना च

भारतीयसंस्कारपरम्परायां मानुषजीवनस्य कालशुद्धिः आधानकालादेव विचार्यते। ज्योतिषशास्त्रे मुहूर्तचिन्तामणि-नारद-संहितादिग्रन्थेषु आधानसमये पित्रोः श्राद्धदिनं, दिवाकालः, परिघादिदुष्टयोगाः, भद्रा, षष्ठी, पर्वतिथयः, रिक्तातिथयः, सन्ध्या-कालः, पौष्ण-मूल-आश्लेषा-मघानक्षत्राणि च त्याज्यानि प्रोक्तानि, यथोक्तम्— "गर्भाधानं त्र्युत्तरेन्द्रर्कमैत्रब्राह्मस्वातीविष्णुवस्वम्बुपे सत्। केन्द्रत्रिकोणेषु शुभैश्च पापैस्त्र्यायारिगैः पुंग्रहदृष्टलग्ने॥" (मुहूर्तचिन्तामणिः ५.१) इति।

परं तु यथा कृषिपाराशरे आधानकालात् प्रवर्षणकालपर्यन्तं नियतोऽवधिः प्रकृतिसिद्धोऽपि वायुवेग-ग्रहस्थितिवशात् परिवर्तते, तथैव प्राणिनां प्रसवकालोऽपि अनेकदा दैववशात् दुष्टकालसन्धिषु सम्पद्यते। जन्मसमये पूर्वक्षितिजे उदितो राशिः लग्नमुच्यते, तदेव देहस्य मूलं भवति— "लग्नं तनुर्भवति देहस्य मूलं प्रधानकम्" (बृहत्पाराशरहोराशास्त्रम् ३.१) तथा "सर्वे भावाः लग्नादेव विचार्याः" इति। चन्द्रमा मनसः सुखदुःखानुभूतेश्च कारको वर्तते— "चन्द्राद् भावफलानि स्युः" (फलदीपिका १.४) तथा "मन एव मनुष्याणां कारणं बन्धमोक्षयोः" (अमृतबिन्दूपनिषत् २) इति। तस्मात् "लग्नात् चन्द्रात् च सूर्याच्च त्रिधा फलविचारणम्" इति नियमेन जन्मकालिकदोषाणां निर्णयः क्रियते। यदा प्रसवसमये तिथि-नक्षत्र-लग्नसन्धयः, चन्द्रक्षयः, उत असामान्यलक्षणानि भवन्ति, तदा अष्टविधमृत्यूनां (व्यथा-दुःख-भय-लज्जा-रोग-शोक-मरण-अपमानानाम्) आशङ्का जायते— "व्यथा दुःखं भयं लज्जा रोगः शोकस्तथैव च। मरणं चापमानं च मृत्युरष्टविधः स्मृतः॥" (बृहत्पाराशरहोराशास्त्रम् ५१.३६) इति। एतदर्थमेव शिशोः आयुरारोग्यरक्षणाय जन्मकालिकदोषशान्तिः विधीयते, यतः "अयासा भरणं मूढाः प्रपश्यन्ति शुभाशुभम्। मरिष्यति यदा दैवात्कोऽत्र भुङ्क्ते शुभाशुभम्॥" (मुहूर्तचिन्तामणिः १.२५) इति।

२. त्रिविधगण्डान्त-मूल-अभुक्तमूलदोषाणां शास्त्रीयमीमांसा

जन्मकालिकदोषेषु गण्डान्तदोषः मूलदोषश्च सर्वाधिकं चर्चितौ स्तः। गण्डशब्दः सन्धिं ग्रन्थिं वा सूचयति, मूलं च जडभागं द्योतयति। बृहत्पाराशरहोराशास्त्रे मुहूर्तचिन्तामणौ च गण्डान्तं त्रिविधं स्मृतम्— "तिथिनक्षत्रलग्नानां गण्डान्तं त्रिविधं स्मृतम्" (मुहूर्तचिन्तामणिः १.२१) तथा विवेकविलासे— "गण्डान्तं त्रिविधं प्रोक्तं नक्षत्रतिथिराशिजम्" (विवेकविलासः ४.१२) इति। जातकपारिजाते बृहज्जातके च शुभकर्मसु जन्मनि च त्रिविधगण्डान्तस्य परित्यागः विहितः— "गण्डान्तं त्रिविधं त्यजेन्नि-धनजन्मर्क्षे च मूलान्तकम्" (जातकपारिजातः ९.२१) इति।

एतेषां त्रयाणां गण्डान्तानां गणितीयं घटिकात्मकं मानं मुहूर्तग्रन्थेषु सूक्ष्मतया निर्धारितमस्ति—

1. **नक्षत्रगण्डान्तम्**: भचक्रे जलतत्त्वराशीनां (मीन-कर्क-वृश्चिकानाम्) अग्नितत्त्वराशीनां (मेष-सिंह-धनूनाम्) च सन्धिस्थलेषु विद्यमानानां षण्णां नक्षत्राणां— रेवती-अश्विन्योः, आश्लेषा-मघयोः, ज्येष्ठा-मूलयोश्च— अन्तरालं चतुर्नाडिकात्मकं (चतुर्घटिकात्मकं, पूर्वनक्षत्रस्य अन्त्ये द्वे घटिके परनक्षत्रस्य च आद्ये द्वे घटिके)

नक्षत्रगण्डान्तं भवति, यथोक्तम्— "पौष्णाश्विन्योः सार्पपित्र्यर्क्षयोश्च यच्च ज्येष्ठामूलयोरन्तरालम्। तद्गण्डान्तं स्याच्चतुर्नाडिकं हि यात्राजन्मोद्वाहकालेष्वनिष्टम्॥" (मुहूर्तचिन्तामणिः १.२२) इति।

2. **लग्नगण्डान्तम् (राशिगण्डान्तम्)**: कर्कट-सिंहराश्योः, वृश्चिक-धनुराश्योः, मीन-मेषराश्योश्च सन्धिस्थले एकघटिकात्मकं (पूर्वराशेः अन्त्या अर्धघटिका पररराशेश्च आद्या अर्धघटिका) लग्नगण्डान्तं भवति— "सिंहकर्कटयोश्चापकीटयोर्मीनमेषयोः। गण्डान्तमन्तरालं तन्नाडिका निधनप्रदा॥" (मुहूर्तचिन्तामणिः १.२३) इति।

3. **तिथिगण्डान्तम्**: पूर्णातिथीनां (पञ्चमी-दशमी-पञ्चदशीनाम्) अन्त्या एका घटिका तथा नन्दातिथीनां (प्रतिपदा-षष्ठी-एकादशीनाम्) आद्या एका घटिका मिलित्वा नाडीद्वयात्मकः सन्धिः तिथिगण्डान्तमुच्यते— "पूर्णानन्दाख्ययोस्तिथ्योः सन्धिर्नाडीद्वयं तथा। गण्डान्तं मृत्युदं जन्मयात्रोद्वाहव्रतादिषु॥" (मुहूर्तचिन्तामणिः १.२४) इति।

विशेषतः अश्विनी-मघा-मूलनक्षत्राणां प्रथमासु तिसृषु घटिकासु यदि दिवा वा रात्रौ प्रसवो भवति, तदा क्रमशः पितुः, आत्मनः, मातुश्च अरिष्टं कथ्यते। मूलनक्षत्रस्य आरम्भिकः प्रहरप्रमाणः कालः उत ज्येष्ठान्त-मूलादिसन्धिः अभुक्तमूलमिति संज्ञायते, यत्र जातस्य शिशोः परित्यागः (अर्थात् गोमुखप्रसवपूर्वकं शान्तिपर्यन्तं पित्रा मुखावलोकनत्यागः) शास्त्रे चोदितः— "अभुक्तमूलं प्रहरप्रमाणं त्यजेत्सुतं तत्र भवां सुतां च" (मुहूर्तचिन्तामणिः ११.८८) इति। धर्मसिन्धौ अपि स्पष्टमुल्लिखितं यत् "ज्येष्ठामूलादिषु जन्मे शान्तिः आवश्यकः" इति। मनोवैज्ञानिक-खगोलीयदृष्ट्या आश्लेषानक्षत्रस्य अधिपतिः सर्पः स्वामी च बुधः, मूलनक्षत्रस्य अधिष्ठात्री निर्ऋतिः स्वामी च केतुः वर्तते; अत्र चन्द्रमणः अवस्थित्या जातकस्य मनसि तीव्रचिन्तनं, शोधप्रवृत्तिः, आकस्मिकपरिवर्तनं वा दृश्यते।

३. कृष्णचतुर्दशी-अमावास्याप्रसवदोषयोः सूक्ष्मविश्लेषणम्

तिथिजन्यदोषेषु कृष्णचतुर्दशीप्रसवः अमावास्याप्रसवश्च प्रामुख्यं भजतः। सामान्यतः कृष्णपक्षे एकादशीतः अमावास्यापर्यन्तं पञ्च तिथयः चन्द्रकिरणानां पूर्णक्षयात् अशुभफलदायिकाः स्मृताः। यवनाचार्याणां मते कृष्णपक्षस्य षष्ठीतः अमावास्यापर्यन्तं चन्द्रमा क्षीणबली (क्षीणेन्दुः) पापग्रहस्वरूपश्च भवति, भट्टोत्पलमते च कृष्णाष्टम्याः अर्धभागात् शुक्लाष्टम्याः अर्धभागपर्यन्तं चन्द्रः पापग्रहः कथ्यते।

बृहत्पाराशरहोराशास्त्रे धर्मसिन्धौ (द्वितीये परिच्छेदे, पृ. २१८-२१९) बृहद्दैवज्ञरञ्जने च कृष्णचतुर्दशीतिथेः सम्पूर्णमानं षड्भागेषु (षडंशेषु) विभज्य प्रत्येकमंशस्य भिन्नं फलं निर्धारितम्। चतुर्दश्याः प्रथमे षडंशे (आदिभागे) जन्म शुभं भवति, द्वितीये षडंशे पितुः मरणं कष्टं वा, तृतीये षडंशे मातुः अरिष्टं, चतुर्थे षडंशे मातुलस्य हानिः, पञ्चमे षडंशे वंशनाशः कुलपीडा वा, षष्ठे च षडंशे धननाशः आत्मनाशो वा भवति।

अमावास्यातिथौ सूर्यचन्द्रयोः एकराशि-एकनक्षत्र-एकनवांश-एकषष्ट्यंशावस्थानेन जातकस्य चित्तचाञ्चल्यं, निर्णयक्षमताह्रासः, मात्रा सह मतभेदः, देशान्तरभ्रमणं, जन्मर्क्षे सूर्यचन्द्रग्रहणयोगे च षण्मासिकं कष्टं सञ्जायते। शास्त्रेषु अमावास्यायाः त्रयो भेदाः निरूपिताः— सिनीवाली, दर्शः, कुहूश्चेति। यदा अमावास्यायां चन्द्रमणः सूक्ष्मा कला अवशिष्टा तिष्ठति, सा सिनीवाली अमावास्या कथ्यते। अहोरात्रस्य सप्तम-अष्टमप्रहरयोः चन्द्रकलायाः सर्वथा अदर्शने कुहूसंज्ञका अमावास्या भवति, पञ्चम-षष्ठप्रहरयोश्च दर्शसंज्ञका ज्ञेया। एतासु जन्मनि सूर्यचन्द्रयोः मूर्तिपूजनपूर्वकं सवितृमन्त्रैश्च आप्यायस्वेत्यादि-सोममन्त्रैश्च अष्टोत्तरशतं (१०८) अष्टाविंशतिप्रमितं (२८) वा हवनं विधाय दोषशान्तिः सम्पाद्यते।

जन्मकालिनदोषस्य नाम	खगोलीय-कालमानं विभागश्च	मुख्यं शास्त्रीयफलम् (अरिष्टसूक्ता)	प्रमुखः शास्त्रीयः शान्त्युपायः
नक्षत्रगण्डान्तम्	रेवती-अश्विनी, आश्लेषा-मघा, ज्येष्ठा-मूलसन्धिः (२+२ = ४ घटिकाः)	पितृ-मातृ-आत्मपीडा, प्रारम्भिकजीवने स्वास्थ्यबाधा च	द्वादशे वा सप्तविंशेऽह्नि नक्षत्रमन्त्रहोमः, छायादानं, गोमुखप्रसवश्च
लग्नगण्डान्तम्	कर्क-सिंह, वृश्चिक-धनु, मीन-मेषसन्धिः (०.५+०.५ = १ घटिका)	देहकष्टं, आयुःसङ्कटं, मानसिकोद्वेगश्च	सूतकान्ते लग्नेश-चन्द्र-नवग्रहशान्तिः, रुद्राभिषेकश्च
तिथिगण्डान्तम्	पूर्णा-नन्दातिथिसन्धिः (१+१ = २ घटिके)	जन्म-यात्रा-विवाहादिषु अरिष्टकारकत्वम्	तिथ्यधिदेवतापूजनं, तिल-घृतहोमः, ब्राह्मणभोजनं च
कृष्णचतुर्दशीप्रसवः	तिथेः षड्भागाः (प्रथमः शुभः, २-६ भागाः दोषयुक्ताः)	क्रमेण शुभं, पितृहरः, मातृहरः, मातुलहरः, वंशहरः, धन/आत्महरः	शिवपूजनं, चतुर्दशीशान्तिहोमः, कांस्यपात्रे घृतछायादानं च
अमावास्याप्रसवः	सिनीवाली, दर्शः, कुहूश्चेति त्रिविधाः भेदाः	चित्तविचलनं, मातृमतभेदः, षण्मासिकं कष्टं च	सूर्य-चन्द्रमूर्तिपूजनं, सावित्री-सोममन्त्रैः १०८ आहुतिभिः होमः
एकनक्षत्र-त्रिक-नालवेष्टितादिः	पितृ-भ्रात्रादिभिः एकर्क्षजन्म, ३ पुत्रानन्तरं कन्या वा विपरीतं, नालवेष्टनम्	कुल-पितृ-भ्रातृपीडा, दैहिकसङ्कटं च	नक्षत्रदेवतापूजनं, गोदानं, सुवर्णदानं, ग्रहशान्तिश्च

४. एकनक्षत्र-त्रिकप्रसव-नालवेष्टित-सदन्तादिदोषाणां विमर्शः

गण्डान्त-चतुर्दशी-अमावास्यातिरिक्तमपि बृहत्पाराशरहोराशास्त्रे धर्मसिन्धौ च अन्ये केचन विशिष्टजन्मदोषाः समालोचिताः सन्ति—

1. **एकनक्षत्रजन्मदोषः**: यदि पितुः मातुः वा जन्मर्क्षे एव सन्तानस्य जन्म भवति, अथवा सहोदरभ्रात्रोः भगिन्योर्वा एकस्मिन्नेव नक्षत्रे प्रसवो जायते, तदा एकनक्षत्रदोषः समुत्पद्यते— "एकनक्षत्रं हि पितृणाम्" (नारदसंहिता १.५६) इति। अस्मिन् योगे नक्षत्राधिदेवतापूजनं होमश्च विहितः।

2. **त्रिकप्रसवदोषः**: यदा गृहे तिसृणां कन्यानामनन्तरं पुत्रजन्म अथवा त्रयाणां पुत्राणामनन्तरं कन्याजन्म भवति, सः त्रिकप्रसवः इत्युच्यते, तन्निवारणाय च प्रसवशान्तिः क्रियते।

3. **सदन्तजन्म नालवेष्टितजन्म यमलजन्म च**: जन्मसमये एव यदि शिशोः मुखे दन्ताः दृश्यन्ते तदा सदन्तजन्मदोषः भवति। अपि च शशांके पापलग्ने वा वृश्चिकेशत्रिभागगे सति शिशुः जरायुनालेन वेष्टितो जायते, यथोक्तम्— "शशांके पापलग्ने वा वृश्चिकेशत्रिभागगे" (बृहत्पाराशरहोराशास्त्रम् ५.५३) इति। नालवेष्टितजन्मनि सर्पवेष्टि-तयोगे यमलजन्मनि च शान्तिविधानेन शिशोः रक्षणं क्रियते।

4. **ग्रहण-भद्रा-व्यतीपातादिदुर्योगजन्म**: अष्टाविंशतियोगेषु व्यती-पात-वैधृति-परिघ-व्याघात-अतिगण्ड-वज्रादिषु अशुभयोगेषु, विष्टि-

करणे (भद्रायाम्), सूर्यचन्द्रग्रहणकाले वा प्रसवो भवेत् तर्हि दुर्योगजन्मशान्तिः अनुष्ठीयते।

५. जन्मकालिकदोषशान्तेः आनुष्ठानिकपरम्परा प्रयोगविधिश्च

धर्मशास्त्रनिबन्धेषु (निर्णयसिन्धु-धर्मसिन्धु-शान्तिमयूखादिषु) तथा मूलशान्तिविधिग्रन्थेषु जन्मकालिकदोषशान्तेः कालनिर्णयः प्रयोगक्रमश्च अतीव व्यवस्थितरूपेण प्रतिपादितः। शास्त्रवचनानुसारेण मूल-गण्डान्तजातानां शिशूनां दोषशान्तिः जन्मनः द्वादशेऽह्नि (सूतकान्ते), सप्तविंशेऽह्नि (यदा चन्द्रमा पुनः जन्मर्क्षे आगच्छति), अन्यस्मिन् शुभदिने, अथवा अष्टमवर्षान्ते विधिवत् आचरणीया— "विप्रांश्च भोजयेदेव दोषशान्तिः प्रजायते। समृद्धिश्च प्रतिदिनं नैरुज्यविभवायुषाम्॥ शुभे दिने मूलजानां द्वादशे वाह्नि जन्मनः। अपि वाष्टमवर्षान्ते विधिवच्छान्तिमाचरेत्॥" (बृहत्पाराशरहोराशास्त्रम् ८९.१४-१५) इति। यावत्कालं शान्तिः न क्रियते तावत्कालं पिता शिशोः मुखावलोकनं न कुर्यात्। समग्रस्य शान्त्यनुष्ठानस्य प्रमुखानि पञ्च अङ्गानि अधोनिर्दिष्टानि सन्ति—

प्रथममङ्गम् – शतच्छिद्रकरकस्नानविधिः: अनुष्ठानस्य आरम्भे यजमानः सपत्नीकः सबालकश्च शतच्छिद्रेण सप्तविंशतिच्छिद्रेण वा मृण्मयकरकेण (घटेन) मङ्गलाभिषेकस्नानं करोति। तस्मिन् करके सप्तधान्यानि, सप्तमृत्तिकाः, शतौषधिमूलं, पञ्चरत्नानि, सप्तविंशतितीर्थजलानि च निक्षिप्यन्ते। सप्तधान्यानां स्वरूपं शास्त्रे इत्थं निर्दिष्टम्— "श्यामाकयवगोधूममुद्गमाषप्रियङ्गवः। धान्यानि च समाख्याता व्रीहयः सप्त सूरिभिः॥" (मूलशान्तिविधिः १.२) इति। सप्तमृत्तिकासु अश्वस्थान-गजस्थान-वल्मीक-नदीसङ्गम-तडाग-राजद्वार-गोशालानां मृत्तिकाः गृह्यन्ते।

द्वितीयमङ्गम् – चतुष्कलशस्थापनं स्वर्णमूलपुरुष-नवग्रहपूजनं च: स्नानानन्तरं स्वस्तिपुण्याहवाचनं विधाय पूर्वस्यां दिशि प्रधानकलशं संस्थाप्य ईशानादिचतुष्कोणेषु चत्वारः मृण्मयाः कलशाः स्थाप्यन्ते। कलशे "सहस्रं धुक्ष्वोरुधारा" इति मन्त्रेण जलं, "याः फलिनीः" इति पूगीफलं, "हिरण्यगर्भः" इति द्रव्यं, "अम्बे अम्बिके अम्बालिके" इति पल्लवं, "धान्यमसि" इति धान्यं, "अग्निर्ज्योतिः" इति च दीपं प्रक्षिप्य प्रतिज्ञासङ्कल्पः क्रियते। ततः प्रथमकलशे "ब्रह्मयज्ञानम्" इति मन्त्रेण ब्रह्मपूजनं, द्वितीये विष्णुपूजनं, तृतीये रुद्रपूजनं, चतुर्थे च इन्द्रपूजनं विधीयते। "गणानां त्वा" इति मन्त्रेण गणपतिम्, "श्रीश्च ते" इति गौरीं सम्पूज्य स्वर्णमयमूलपुरुषस्य, नवग्रहाणां, लोकपालानां, दिक्पालानाम्, अधिदेवता-प्रत्यधिदेवतानां च पूजनं सम्पद्यते।

तृतीयमङ्गम् – एकाशीतिदर्भपरिस्तरणं वैदिकमन्त्रैर्हवनं च: तदनन्तरम् आचार्यः एकहस्तप्रमाणायां वेद्याम् अग्निं संस्थाप्य ब्रह्माणमुपवेशयति। वामहस्ते एकाशीतिदर्भदलानि (८१ कुशान्) गृहीत्वा तेषां चतुर्भागान् कृत्वा आग्नेयादीशानान्तं, ब्रह्मणोऽग्निपर्यन्तं, नैर्ऋत्याद्वायव्यान्तम्, अग्नितः प्रणीतापर्यन्तं च परिस्तरणं क्रियते। पवित्रच्छेदन-अधिश्रयण-स्रुवसम्मार्जन-आज्योत्पवनादिकं विधाय समित्-आज्य-तिल-चरुभिः नवग्रहाणां ग्रामदेवतानां जन्मर्क्षदेवतायाश्च अष्टोत्तरशतं (१०८) अष्टाविंशतिर्वा (२८) आहुतयः दीयन्ते। गण्डमूलनक्षत्रेभ्यो विहिताः प्रमुखाः वैदिकमन्त्राः इमे सन्ति—

- **अश्विनीनक्षत्रमन्त्रः**: "ॐ अश्विनोर्भैषज्येन तेजसा ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि॥" (यजुर्वेदः २०.८०)।
- **आश्लेषानक्षत्रमन्त्रः**: "ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु। ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः स्वाहा॥" (यजुर्वेदः १३.६)।
- **मघानक्षत्रमन्त्रः**: "ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः। पितामहेभ्यः स्वधायिभ्यः स्वधा नमः। प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः॥" (यजुर्वेदः १९.३६)।
- **ज्येष्ठानक्षत्रमन्त्रः**: "ॐ सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान्॥" (ऋग्वेदः ३.४७.२)।
- **मूलनक्षत्रमन्त्रः**: "ॐ एष ते निर्ऋते भागस्तं जुषस्व स्वाहाग्निनेत्रेभ्यो देवेभ्यः परःसद्भ्यः स्वाहा। यमनेत्रेभ्यो दक्षिणासद्भ्यः स्वाहा विश्वेदेवनेत्रेभ्यो देवेभ्यः पञ्चाशद्भ्यः स्वाहा॥" (तैत्तिरीयब्राह्मणम् ३.१.२)।

होमान्ते "ॐ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम्" (यजुर्वेदः ७.२४) इति मन्त्रेण पूर्णाहुतिं दत्त्वा षट्पञ्चाशदधिकमुष्टिशतद्वयतण्डुलपूर्णपात्रं ब्रह्मणे समर्प्य स्रुवभस्मना त्र्यायुषकरणं क्रियते, दधि-माषान्न-सिन्दूर-दीपैश्च क्षेत्रपालाय भूतप्रेतादिभ्यश्च बलिदानं दीयते।

चतुर्थमङ्गम् – घृतपूर्णकांस्यपात्रे छायादानविधिः: अपमृत्युनिवारणाय गण्डदोषोपशान्तये च षोडशपलप्रमिते कांस्यपात्रे घृतं प्रपूर्य तस्मिन् बालकस्य मुखछायां संक्राम्य ब्राह्मणाय तद् पात्रं दीयते— "छायादानं कांस्यपात्रं पलैः षोडशभिर्बुधैः। घृतपूर्णं च दातव्यं गण्डदोषोपशान्तये॥ आज्यस्त्वं सर्वदेवानां प्रियः स्वस्तिकरः शुचिः। त्वयि संक्रान्तबिम्बोऽयं बालो मूलभसम्भवः। सर्वदोषपरित्यक्तो जायतां निरुपद्रवः॥" (मूलशान्तिविधिः १.१५-१६) इति। एतत् छायादानं दत्त्वैव पिता बालकस्य मुखावलोकनं करोति।

पञ्चममङ्गम् – गोमुखप्रसवविधिः: रेवती-अश्विनी-पुष्य-आश्लेषा-मघा-चित्रा-मृगशिरा-मूलनक्षत्रेषु जातस्य बालकस्य प्रतीकात्मकपुनर्जन्मार्थं गोमुखप्रसवः क्रियते। भूमौ धान्यं निक्षिप्य तदुपरि वंशपात्रे तिलकुशान् आस्तीर्य रक्तवस्त्रे शिशुं प्राङ्मुखं शाययित्वा गोः मुखं स्पर्शयित्वा पञ्चगव्येन आपोहिष्टादिमन्त्रैश्च बालकं सम्प्रोक्ष्य इमं मन्त्रं पठन्ति—

"गावः कामप्रदातारो गावो लोकस्य मातरः।
गोमुखान्निःसृतो बालो गोमुखश्वासमार्जितः॥
पुनर्जातमिति ध्यायन् वंशपात्रद्वयाम्बरात्।
सर्वदोषपरित्यक्तो जायते निरुपद्रवः॥
तां गां दद्यात् प्रयत्नेन कम्बलं च द्विजातये।"

(मूलशान्तिविधिः १.१७-१८) इति।

६.जन्मकालिकदोषशान्तेः दार्शनिक-मनोवैज्ञानिक-सामाजिकानुशीलनम्

शास्त्रीयविवेचनस्य पूर्णतायै जन्मकालिकदोषशान्तिविधीनाम् आध्यात्मिकं मनोवैज्ञानिकं च महत्त्वमपि अवधेयमस्ति। भारतीयदर्शने मनसः त्रयः स्तराः अङ्गीकृताः— चेतनं, अवचेतनं, अचेतनं चेति। यदा गृहे मूल-गण्डान्त-अमावास्या-चतुर्दश्यादिषु कालसन्धिषु शिशोः जन्म भवति, तदा मातापित्रोः चित्ते अज्ञातभयम् उद्वेगश्च समुत्पद्येते। अस्मिन् सन्दर्भे द्वादशे वा सप्तविंशेऽह्नि समायोजितं शान्तिकर्म कुटुम्बस्य सामूहिकमवचेतनं मनः भयमुक्तं करोति।

मनुस्मृतौ पाकयज्ञानां होमबलिकर्मणां च अपेक्षया जपयज्ञस्य पञ्चमहायज्ञानां च वैशिष्ट्यं प्रतिपादितम्—

"ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः।
सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम्॥" (मनुस्मृतिः २.८६) तथा च

"स्वाध्यायेनार्चयेतर्षीन्होमैर्देवान्यथाविधि।
पितॄञ्श्राद्धैश्च नृनन्नैर्भूतानि बलिकर्मणा॥" (मनुस्मृतिः ३.८१) इति।

एतदेव पञ्चमहायज्ञतत्त्वं मूलशान्तिविधौ अपि प्रतिफलितं दृश्यते। अपि च यथा अग्निपुराणे दीपदानस्य महिमा वर्णितः— "देवद्विजातिगृहे दीपदोऽब्दं स सर्वभाक्" (अग्निपुराणम् २००.२) तथा पद्मपुराणे—

"पापिनः पितरो ये च लुप्तपिण्डोदकक्रियाः।
तेऽपि यान्ति परां मुक्तिं दीपदानस्य पुण्यतः॥"

(पद्मपुराणम् ६.१२२)

इति, तथैव चतुर्दश्यां मौक्तिकदानं, अमावास्यायां माणिक्यरत्नदानं, शिवरात्रिचतुर्दश्यां च शिवलिङ्गाभिषेकः पञ्चाक्षरमन्त्रजपश्च जन्मकालिकारिष्टं शमयति। निर्णयसिन्धौ देवलवचनेन प्रतिपादितं यत्— "व्रतोपवासनियमे घटिकैकापि या भवेत्। स्तोकापि सा महापुण्या यस्यां सूर्योदयो भवेत्॥" (निर्णयसिन्धुः २.३५४) इति, तथैव जन्मकालिकदोषनिर्धारणेऽपि सूक्ष्मदृक्तुल्यपञ्चाङ्गगणितेन इष्टकालं, भयातं, भभोगं, स्पष्टलग्नं च साधयित्वा एव गण्डान्तघटिकानां निर्णयः करणीयः। महर्षिणा पराशरेण स्पष्टमुदीरितम्—

"शान्ताय गुरुभक्ताय सर्वदा सत्यवादिने।
आस्तिकाय प्रदातव्यं ततः श्रेयो ह्यवाप्स्यति॥
न देयं परशिष्याय नास्तिकाय शठाय वा।"

(बृहत्पाराशरहोराशास्त्रम् १.१७-१८) इति।

उपसंहारः

उपर्युक्तेन समग्रेण शास्त्रीयविवेचनेन इदं सुस्पष्टं भवति यत् भारतीयज्योतिषशास्त्रे धर्मशास्त्रे च प्रतिपादिताः जन्मकालिकदोष-शान्तिविधयः नैव कपोलकल्पिताः भयभीतिजनकाः वा सन्ति, अपि तु तेषां पृष्ठे सुदृढं खगोलीयगणितं, सूक्ष्मं कर्मविपाकदर्शनम्, उच्चकोटिः मनोवैज्ञानिकचिकित्सा च सन्निहिता वर्तते। वेदाङ्ग-ज्योतिषस्य होरा-मुहूर्तस्कन्धौ जन्मकालस्य तिथि-नक्षत्र-लग्नसन्धी-नां (त्रिविधगण्डान्तानां), कृष्णचतुर्दशीषडंशानाम्, अमावास्यायाः सिनीवाली-दर्श-कुहूभेदानां च सूक्ष्मं गणितीयं निदानं प्रस्तौतः, धर्मशास्त्रनिबन्धाश्च (निर्णयसिन्धु-धर्मसिन्धु-शान्तिमयूखादयः) वैदिकमन्त्रैस्तथा स्मार्तविधिभिः तेषां प्रायश्चित्तरूपां शान्तिं विदधति। गण्डमूल-चतुर्दश्यादिदोषाः सर्वत्र एकरूपाः घातकाः न भवन्ति; षट्सु गण्डमूलनक्षत्रेषु केवलं सन्धिपाद एव विशेषसंवे-दनशीलो भवति, तथा च लग्नेश-चन्द्रयोः बलेन शुभग्रहाणां केन्द्रावस्थानेन च दोषस्य स्वतः परिहारोऽपि शास्त्रेषु स्वीकृतः। शतच्छिद्रकरकस्नानं, चतुष्कलशपूजनं, नक्षत्रमन्त्रहोमः, घृतपूर्णकां-स्यपात्रे छायादानं, गोमुखप्रसवश्चेति पञ्चाङ्गविधिः मानवीय-चेतनायाः सात्त्विकबलं वर्धयितुं, मातृशिश्वोः आरोग्यं रक्षितुं, अदृढप्रारब्धस्य तीक्ष्णतां च प्रशमयितुं महर्षिभिः प्रदत्तः अमूल्यः शास्त्रीयः निधिः वर्तते।

सन्दर्भसूची

- उपाध्यायः, क. (२०२०). *धर्मसिन्धुः* (र. शास्त्री, सम्पा. तथा अनु.). चौखम्बा संस्कृत प्रतिष्ठानम्.
- उपाध्यायः, ब. (२०१२). *संस्कृतवाङ्मयस्य बृहदितिहासः (षोडशः खण्डः – ज्योतिषशास्त्रम्)*. उत्तरप्रदेशसंस्कृतसंस्थानम्.
- कमलाकरभट्टः. (१९०१). *निर्णयसिन्धुः (तृतीयः परिच्छेदः)*. निर्णयसागरमुद्रणालयः.
- कमलाकरभट्टः. (२०१०). *निर्णयसिन्धुः*. खेमराज-श्रीकृष्णदासप्रकाशनम्.
- झा, स. (२०१५). *जन्मकुण्डलीरचना एवं फलविचारः*. ठाकुरप्रसाद एण्ड सन्स.
- नीलकण्ठभट्टः. (१९२२). *भगवन्तभास्करः (शान्तिमयूखः)*. निर्णयसागरमुद्रणालयः.
- पराशरः. (१९९५). *बृहत्पाराशरहोराशास्त्रम् (प्रणवाक्षरव्याख्योपेतम्, खण्डद्वयम्)* (स. च. मिश्रः, सम्पा. तथा व्या.). रञ्जन पब्लिकेशन्स.
- पराशरः. (२०२०). *बृहत्पाराशरहोराशास्त्रम्* (स. झा, सम्पा. तथा अनु.). चौखम्बा संस्कृत सीरीज ऑफिस.
- पाठकः, श. (२०१८). *दशाफलदर्पणम्*. चौखम्बा प्रकाशनम्.
- पाण्डेयः, ह. (२०१०). *हमारा ज्योतिष और धर्मशास्त्र*. उत्तरप्रदेशसंस्कृतसंस्थानम्.
- मनुः. (१९१७). *मनुस्मृतिः* (ग. प्र. द्विवेदी, सम्पा.). नवलकिशोरप्रेस.
- मित्रमिश्रः. (१९१७). *वीरमित्रोदयः (संस्कारप्रकाशः)*. चौखम्बा संस्कृत सीरीज ऑफिस.
- मिश्रः, र. (२०१५). *मूलशान्तिविधिः (भाषाटीकासहितः)*. ठाकुरप्रसादप्रकाशनम्.
- रामदीनदैवज्ञः. (२०१०). *बृहद्दैवज्ञरञ्जनम् (श्रीधरीव्याख्यासहितम्)* (म. चतुर्वेदी, सम्पा.). मोतीलाल बनारसीदास.
- रामदैवज्ञः. (२०००). *मुहूर्तचिन्तामणिः* (क. द. जोशी, सम्पा.). मोतीलाल बनारसीदास.
- वराहमिहिरः. (१९५९). *बृहत्संहिता (विमलाटीकासहिता)* (अ. झा, सम्पा.). चौखम्बा विद्याभवनम्.
- वराहमिहिरः. (२०१५). *बृहज्जातकम्* (अ. झा, सम्पा.). चौखम्बा संस्कृत सीरीज ऑफिस.
- वेदव्यासः. (१९८५). *अग्निपुराणम्* (ब. उपाध्यायः, सम्पा.). चौखम्बा संस्कृत संस्थानम्.
- वैद्यनाथदैवज्ञः. (२०१५). *जातकपारिजातः (सौरभाष्योपेतः)* (क. शास्त्री तथा ग. कु. ओझा, सम्पा.). मोतीलाल बनारसीदास.